Book-Post

48

To,

If not delivered
please return to :

EDITOR,
THE VEDIC PATH,
P.O. Gurukul Kangri,
(U.P.) 249404.

(1)

ननिवृत्तेः ज्ञानमात्रसाध्यत्वात् तमेवविदित्वातिमृत्युमेतिनान्यः
पंथाविद्यतेऽयनायेतिसाधनांतरनिषेधाच्चनन्ववतत्प्राप्तिहेतुर्विज्ञा
नंकर्मचोक्तंमहात्मने इतिकर्मणोमोक्षहेतुत्वस्मरणात् ज्ञान
कर्मणोःसमुच्चयपक्षइतिचेन्न नित्यनैमित्तिकैरेवकुर्वाणोदुरितक्ष
यंचज्ञानंविमलीकुर्वन्नभ्यासेनपाचयेत् अभ्यासात्पक्ववि
ज्ञानंकैवल्यंलभतेनरः इत्यादिनाकर्मणोज्ञानसाधनत्वप्र
तिपादनाज्ज्ञानद्वारेवकर्ममोक्षसाधनंनसाक्षात् तस्मात्पदार्थज्ञा
नस्यमोक्षःपरमप्रयोजनमित्येवरमणीयम् इतिश्रीश्रीमद
न्नंभट्टोपाध्यायविरचितातर्कदीपिकासमाप्ताः श्रीरस्तु श्रीः
संवत् १८७७ भाद्रपदशुक्लत्रयोदश्यां राघवपुरेलिपीकृतं
श्रीकृष्णार्पणमस्तु ॥ श्रीगोपालायनमोनमः ॥ श्रीमत्
रामकृष्णेनलिखितंइदंपुस्तकंगोकुलरामस्यार्थम् श्रीः

राम:
२४

तर्कदीपिका

2

लक्ष्यैकदेशवृत्तित्वे सति अन्यत्रावर्त्तनम् अव्याप्तिः
यथा २ गोः कपिलत्वं लक्षणं लक्ष्यैकदेशवृत्तित्वे
सति कपिलायां गवि वर्त्तमानत्वेपि अन्यत्र श्वे
तादौ गोष्वसत्वाद् अव्याप्तिः लक्ष्यवृत्तित्वे
सति अलक्ष्यवृत्तित्वम् अतिव्याप्तिः यथा शृंग
त्वं गोलक्षणं लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वं
महिष्यादौ सत्वाद् अतिव्याप्तिः लक्ष्यमात्रावर्त्त
नम् असंभवः यथा गोरेकशफत्वं लक्षणं गविमा
त्रे अवर्त्तमानत्वाद् असंभवः एतद्दोषत्रयशून्य
मेनाम् लक्षितं यत्तत् असाधारणधर्मत्वं
तदेव लक्षणम्

शब्दाध्याहारस्य अर्थज्ञानार्थत्वात् शब्दस्यार्थमविज्ञाय शब्दाध्याहारासं
भवात् अर्थाध्याहार एव युक्त इति चेन्न पदविशेषजन्यपदार्थोपस्थितेः
शाब्दज्ञानहेतुत्वादन्यथा घटः कर्मत्वं अपनयनं कृतिरित्यत्रापि शाब्द
ज्ञानहेतुत्वादन्यथा घटेपि प्रसंगात् पंकजादिपदेषु योगरूढिः अ
वयवशक्तिर्योगः समुदायशक्तिः रूढिः नियतपद्मज्ञानार्थं समुदाय
शक्तिः अन्यथा कुमुदेपि प्रयोगप्रसंगः इतरान्वितेशक्तिरिति प्राभाकराः
अन्वयस्य वाक्यार्थतया भानप्रसंगात् अन्वयांशेपि शक्तिर्न कल्पनीये
ति गौतमीयाः आकांक्षेति आकांक्षादिज्ञानमित्यर्थः अन्यथा आ
कांक्षादिभ्रमात् शाब्दधीभ्रमो न स्यात् आकांक्षालक्षणमाह पदस्ये
ति योग्यतालक्षणमाह अर्थेति सन्निधिलक्षणमाह पदानामि
ति अविलंबेन पदार्थोपस्थितिः सन्निधिः उच्चारणं तु तदुपयोगतया
उक्तं गौरश्व इति घटः कर्मत्वमित्यत्र आकांक्षोदाहरणं द्रष्टव्यं वैदि
कस्य वैलक्षण्यमाह वैदिकमीश्वरोक्तत्वात् इति ननु वेदस्यानादि
त्वात् कथमीश्वरोक्तमिति चेन्न वेदः पौरुषेयः वाक्यसमूहत्वा

त.दी.
१८

भारतादिवत् नचस्मर्यमाणकर्तृत्वमुपाधिः गौतमादिभिः शिष्यपरं
परया वेदेपि सकर्तृत्वस्मरणेन साधनव्यापकत्वात् तस्मात्तपनात्त्रयो
वेदा जायंते इति श्रुतेश्च ननु वर्णाः नित्याः स एवायं गकार इति प्रत्य
भिज्ञाबलात् कथं वेदस्यानित्यत्वं इति चेन्न उत्पन्नो गकार इति प्र
तीत्या वर्णानामनित्यत्वात् आनुपूर्वविशिष्टवाक्यस्यानित्यत्वाच्च॥
तस्मादीश्वरोक्त वेदः मन्वादिस्मृतिनामाचाराणां च वेदमूलकतया
प्रामाण्यं स्मृतिमूलकवाक्यानामिदानीमनध्ययनात् तन्मूलभूता
काचिच्छाखोच्छिन्नेति कल्प्यते ननु पठ्यमानवेदवाक्योत्सादस्य कल्प
यितुमशक्यतया विप्रकीर्णवादस्याप्युक्तत्वात् नित्यानुमेयो वेदो मूल
मिति चेन्न तथापि वर्णानुपूर्वीज्ञानाभावेन बोधकत्वासंभवात् नन्वेता
नि पदानि स्मारितार्थसंसर्गवंति आकांक्षादिमत्पदकदंबकत्वात्॥
मत्वाक्यवत् इत्यनुमानादेव संसर्गज्ञानसंभवात् शब्दो न प्रमाणांतर
मिति चेन्न अनुमित्यपेक्षया शाब्दज्ञानस्य विलक्षणस्य शाब्दात्प्रत्येमी
त्यनुव्यवसायसाक्षिकस्य सर्वसंमतत्वात् नन्वर्थापत्तिरपि प्रमाणां
तरमस्ति पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा पीनत्वान्यथानुप

पत्याराविभोजनमर्थापत्या कल्प्यत इति चेन्न देवदत्तो रात्रौ भुंक्ते दिवा भुंजा
नत्वे सति पीनत्वात् इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् शतं प
चाशदिति संभवोप्यनुमानमेव इहवटे यक्षस्तिष्ठतीत्यैतिह्यमपि प्रमा
नमूलकत्वात् शब्द एव चेष्टापि शब्दानुमानद्वारा एव कार्यहेतुरिति
नमानान्तरं तस्मात् प्रत्यक्षानुमानोपमानशब्दाश्चत्वार्येव प्रमाणा
न्युक्तानि इदानीं तेषां ज्ञानानां तद्वति तत्प्रकारकत्वं स्वतो ग्राह्यं पर
तो वेति विचार्यते तत्र विप्रतिपत्तिः ज्ञानप्रामाण्यं तदप्रामाण्याग्रा
हकयावत् ज्ञानग्राहकसामग्रीग्राह्यं नवा अत्र विधिकोटिः स्व
तस्त्वं निषेधकोटिः परतस्त्वं अनुमानग्राह्यत्वेन सिद्धसाधनवार
णाय यावदिति इदं ज्ञानमप्रमेयेति ज्ञानेनाप्रामाण्यग्रहणद
शावारणाय ज्ञानाः प्रामाण्यग्राहकेति इदं ज्ञानमप्रमेत्यनुव्यवसाय
निष्ठप्रामाण्यग्राहकस्य अप्रामाण्यग्राहकत्वाभावात् स्वतस्त्वं न
स्यात् अतस्तदिति तस्मिन् प्रामाण्याभावे अप्रामाण्यग्राहकद
त्यर्थः उपाहृतस्थले व्यवसाये प्रामाण्यग्राहकस्यापि अनुव्य
वसायेतरग्राहकत्वात् स्वतस्त्वसिद्धिः तत्र स्वतश्च प्रामाण्यं गृह्य

ते घटमहं जानामीत्यनुव्यवसायेन घटघटत्वयोरिव तत्संबंधस्यापि वि
षयीकरणात् व्यवसायरूपपत्यास्तत्वे तुल्यत्वात्पुरोवर्तिनि प्रकारसं
बंधस्यैव प्रमात्वपदार्थत्वादिति चेन्न स्वतःप्रामाण्यपक्षे जलज्ञानं प्रमान
वेत्यसदशायां प्रमात्वसंशयो न स्यात् अनुव्यवसायेन प्रामाण्यस्य निश्चि
तत्वात् तस्मात्स्वतोग्राह्यत्वाभावात्परतोग्राह्यत्वं तथाहि प्रथमं जलज्ञा
नानंतरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानं प्रमा समर्थप्रवृत्ति
जनकत्वात् यन्नैवं तन्नैवं यथाप्रमेति व्यतिरेकिणा प्रमात्वं निश्चीय
ते द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टांतेन तत्सजातीयत्वलिंगेन अन्व
यव्यतिरेकिणापि गृह्यते प्रमाया गुणजन्यत्वमुत्पत्तौ परतस्त्वं प्रमासा
धारणगुणः अप्रमासाधारणं दोषः तत्र प्रत्यक्षे विशेषणवत् विशेष्य
सन्निकर्षो गुणः अनुमितौ व्यापकवति व्यापकज्ञानं उपमितौ यथार्थ
सादृश्यज्ञानं शाब्दज्ञाने यथार्थयोग्यताज्ञानमित्याद्यूहनीयं पुरोवर्तिनि
प्रकाराभाववत्त्वव्यवसायेन अनुपस्थितत्वात् अप्रमात्वं परतस्त्वं गृह्यते॥
पित्तादिदोषजन्यत्वादुत्पत्तौ परतस्त्वं ननु सर्वेषां ज्ञानानां यथार्थत्वात् अ
यथार्थज्ञानमेव नास्ति न च शुक्ताविदं रजतमिति ज्ञानात् प्रवृत्तिदर्शनात् ऽन्य
थाख्यातिसिद्धिरिति वाच्यं रजतस्मृतिपुरोवर्तिज्ञानाभ्यामेव प्रवृत्तिसंभवात्

उपस्थिते समेदाग्रहस्येव सर्वत्र प्रवर्तकत्वेन भेदं रजतमित्यादावतिप्रसंगाभावात्
इति चेन्न सत्यरजतस्थले पुरोवर्त्ति विशेष्यकरजतत्वप्रकारकज्ञानस्य लाघ
वेन प्रवृत्तिजनकत्वसंभुक्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञान
स्यैव कल्पनात् अयथार्थज्ञानं विभजते अयथार्थ इति स्वप्नस्य मानसवि
पर्ययरूपत्वात् न त्रैविध्यविरोधः संशयलक्षणमाह एकेति घटपटादि
ति समूहालंबने तिव्याप्तिवारणाय एकेति घटो द्रव्यमित्यादावतिव्याप्ति
वारणाय विरुद्धेति पटत्वविरुद्ध घटत्ववानित्य जातिव्याप्तिवारणाय ना
नेति विपर्ययलक्षणमाह मिथ्येति तदभाववति तत्प्रकारकनिश्चय इत्य
र्थः तर्कलक्षणमाह व्याप्येति यद्यपि तर्क विपर्ययेऽन्तर्भवति तथापि
प्रमाणानानुग्राहकत्वात् भेदेन कीर्त्तनं स्मृतिं विभजते स्मृतिरिति सु
खं लक्षयति सर्वेषामिति सुखमहमित्याद्यनुव्यवसायगम्यसुखत्वा
दिलक्षणं यथास्मृतं तत्स्वरूपकथनमिति द्रष्टव्यं संस्कारं विभजते
संस्कार इति संस्कारत्वजातिमान् संस्कारः वेगस्य लक्षणमाह वेग
इति वेगत्वजातिमान् वेगः भावनां लक्षयति अनुभवेति आत्मादा
वतिव्याप्तिवारणाय अनुभवेति अनुभवध्वंसे तिव्याप्तिवारणाय ॥
स्मरतीति स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तं स्थितिस्थापकं ल

लक्षयति अन्यथेति संख्यादयो नैमित्तिकद्रवत्ववेगस्थितिस्थापक
सामान्यगुणाः अन्ये रूपादयो विशेषगुणाः द्रव्यविभाजकोपाधिद्वय
सामानाधिकरण्यावृत्तिजातिमत्त्वं विशेषगुणत्वं कर्मणो लक्षणमाह च
लनेति उत्क्षेपणादीनां कार्यभेदमाह ऊर्ध्वेति शरीरेति वक्रतासं
पादकं कर्म कुंचनं ऋजुतासंपादकं प्रसारणं अन्यत्सर्वं समानं इ
त्यर्थः सामान्यं लक्षयति नित्यमिति परमाणुपरमाणादेअ
तिव्याप्तिवारणाय एकेति अनुगतत्वं समवेतत्वं तेनात्यंताभा
वातिव्याप्तिः विशेषं लक्षयति नित्येति समवायं लक्षयति नित्ये
ति संबंध इति संयोगातिव्याप्तिवारणाय नित्येति आकाशादाव
तिव्याप्तिवारणाय संबंधेति अयुतसिद्धलक्षणमाह यथेति
नीलो घट इति विशिष्टबुद्धिरिति विशेषणविशेष्यसंबंधविषया
विशिष्टप्रत्ययत्वात् दंडीति प्रत्ययवदिति समवायसिद्धिः अ
वयवावयविनोरिति द्रव्यसमवायिकारणमवयवः तज्जन्यद्रव्य
मवयवी प्रागभावं लक्षयति अनादिरिति आकाशादावतिव्या
प्तिवारणाय सांत इति घटादावतिव्याप्तिवारणाय अनादिरिति प्र

तियोगिजन्यः प्रतियोगिसमवायिवृत्तिः ध्वस्त इति व्यवहारहेतुः ध्वंसः अ
त्यंताभावं लक्षयति त्रैकालिक इति अन्योन्याभावेपि व्याप्तिवारणाय सं
सर्गावछिन्न इति ध्वंसप्रागभावयोः इति व्याप्तिवारणाय त्रैकालिक इति
अन्योन्याभावं लक्षयति तादात्म्य इति प्रतियोगितावछेदक आरोप्य
संसर्गभेदाद्वैकप्रतियोगिकयोरत्यंताभावान्योन्याभावयोर्वैकुत्वं केवल
देवदत्ताभावात् दंडाभाव इति प्रतीत्या विशिष्टाभावः अतिरिक्तः एकसत्वे
द्वौ नस्तः इति प्रतीत्या द्वित्वावछिन्नाभावः संयोगसंबंधेन घटवति सम
वायसंबंधेन घटाभावः तत्तत् घटाभावात् घटत्वावछिन्न प्रतियोगिकसा
मान्याभावः अतिरिक्तः एवमन्योन्याभावोपि घटत्वावछिन्न पटो नास्ति इति
अधिकरणधर्मावछिन्नाभावो नांगीक्रियते पटे घटत्वं नास्ति इति तस्यार्थः॥
अतिरिक्तत्वे शंका केवलान्वयि सामान्यसामान्यविशेषाभावयोर्भेदमाह तदि
ति भावोत्यंताभाव एवसमयविशेषे प्रतीयमानः घटाभाववति घटानयने अ
त्यंताभावस्यान्यत्रगमनाभावेपि अप्रतीतिः घटापसरणे नास्ति प्रमीतेः
भूतले घटसंयोगप्रागभावध्वंसयोर्घटात्यंताभावप्रतीतिर्घटोपसरणे
च संयोगध्वंससत्वात्प्रतीतिरिति ननु केवलाधिकरणादेव नास्तीति व्य
वहारोपपत्तौ अभावो न पदार्थांतरमिति गुरवस्तन्न अभावानंगीका

10

त.दी.
२१

रेवैकल्पस्य निर्वक्तुमशक्यत्वात् अभावाभावो भाव एव नातिरिक्तः अन
वस्थाप्रसंगात् ध्वंसप्रागभावः प्रागभावध्वंसश्च प्रतियोग्येवेति प्राचीनाः अ
भावाभावोऽतिरिक्त एव तत्तृतीयाभावस्य प्रथमाभावरूपत्वात् नानवस्थे
ति नवीनाः ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयव
तर्कनिर्णयवादजल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानां त
त्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायशास्त्रे षोडशपदार्थानामुक्त
त्वात्कथं सप्तैवेत्यत आह सर्वेषामिति सर्वेषां सप्तस्वेवांतर्भाव
इत्यर्थः आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफ
लदुःखापवर्गास्तु प्रमेयमिति द्वादशविधं प्रमेयं प्रवृत्तिः धर्माध
र्मौ रागद्वेषमोहा दोषाः रागः इच्छा द्वेषो मन्युः मोहः शरीरादावात्म
भ्रमः प्रेत्यभावो मरणं फलं भोगः अपवर्गो मोक्षः स च स्वसमा
नाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः प्रयोज
नं सुखप्राप्तिः दुःखहानिश्च दृष्टांतो महानसादिः प्रमाणकत्वे
नाभ्युपगतोऽर्थः सिद्धांतः निर्णयो निश्चयः स च प्रमाणफलम्॥

तत्वबुभुत्साकथावादः उभयसाधनवती विजिगीषुकथा जल्पः स्वपक्ष
स्थापनहीना वितंडा कथा नाम नानावक्तृक पूर्वोत्तरपक्षप्रतिपक्ष
प्रतिपादकः वाक्यसंदर्भः अभिप्रायांतरेण प्रयुक्तस्य अर्थांतरं प्रक
ल्प्य दूषणं छलं असदुत्तरं जातिः साधर्म्य उत्कर्षाऽपकर्ष वर्ण्यावर्ण्य
विकल्प साध्य प्राप्त्यऽप्राप्ति प्रसंग प्रतिदृष्टांत अनुत्पत्ति संशय प्रक
रण हेत्वर्थापत्य विशेषोपलब्ध्यऽनुपलब्धि कारण नित्या नित्य कार्य
कार्य समान जातयः वादिनोऽपजयहेतुः निग्रहस्थानं प्रतिज्ञाहानिः
प्रतिज्ञांतरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वंतरं अर्थांतरं
अविज्ञातार्थं निरर्थकं अपार्थकं अप्राप्तकालं न्यूनं अधिकं पुनरु
क्तं अननुभाषणं अज्ञानं अप्रतिभा विक्षेप मतानुज्ञाऽपर्यनुयो
ज्योपेक्षणं निरनुयोज्यानुयोगः अपसिद्धांतः हेत्वाभासश्च निग्रह
स्थानानि शेषं सुगमं ननु करतलानलसंयोगे सत्यपि प्रतिबंधके
सति दाहानुपपत्तेः शक्तिः पदार्थांतरमिति चेन्न प्रतिबंधकाभावस्य
कार्यमात्रे कारणत्वेन शक्तेरनुपयोगात्कारणस्यैव शक्तिपदार्थ

त्वात् ननु भस्मादिनाकाष्ठादेः प्रवृत्तिदर्शनात् आपेक्षाछिद्रिं गीकार्य्ये
तिचेन्न भस्मादिसंयोगसमानकालीनत्वस्य स्पर्शप्रतियोगिक
भावदत्तावत्ति भस्मादिसंयोगध्वंसस्यप्रवृत्तिपदार्थत्वात् स्वत्वमपि
पदार्थान्तरं पथ्येण विनियोगयोग्यत्वस्य त्वस्वरूपत्वात् तदवच्छेदकं
चप्रतिग्रहादिलब्धत्वमेवेति अथविधिर्निरूप्यते प्रयत्नजनकचि
कीर्षाजनकज्ञानविषयोविधिः तत्प्रतिपादकः लिङादिर्वा कृत्य
साध्येप्रवृत्त्यदर्शनात् कृतिसाध्यताज्ञानप्रवर्त्तकं नचविषभ
क्षणादौ प्रवृत्तिःप्रसंगः इष्टसाधनतालिंगककृतिसाध्यताज्ञान
स्यकाम्यस्थलेविहितकालजीवित्वनिमित्तज्ञानजन्यस्य नित्य
नैमित्तिकस्थलेप्रवर्त्तकत्वात् नचाननुगमः स्वविशेषणवता
प्रतिसंधानजन्यत्वस्यअनुगतत्वादितिगुरुवः तन्न लाघवे
नकृतिसाध्येष्टसाधनताज्ञानस्येवचिकीर्षाद्वाराप्रयत्नजनक
त्वात् नचनित्यइष्टसाधनत्वाभावादप्रवृत्तिप्रसंगः तत्रापिप्रत्य
वायपरिहारस्यपापक्षयस्यफलत्वकल्पनात् तस्मात्कृति

13

साध्येष्टसाधनत्वमेव लिङाद्यर्थः ननु ज्योतिष्टोमेन स्वर्गकामो यजे
तेत्यत्र लिङा स्वर्गसाधनं कार्यं प्रतीयते यागस्याशुतर विनाशिनः का
लांतरभाविस्वर्गसाधनत्वायोग्यत्वात् यागस्यापि कार्यमपूर्वमेव लि
ङाद्यर्थः कार्यं कृतिः साध्यं कृतेः सविषयत्वात् विषयाकांक्षायां विधे
यागो विषयत्वेनान्वेति कस्य कार्यमिति नियोज्याकांक्षायां स्वर्गकामप
दं नियोज्यपरतयान्वेति कार्यबोद्धा नियोज्यः तेन ज्योतिष्टोमनामक
याग विषयं स्वर्गकामस्य कार्यमिति वाक्यार्थः संपद्यते वैदिकलिङ-
त्वात् यावज्जीवमग्निहोत्रं जुहोत् इति नित्यवाक्येपि अपूर्वमेव वा
च्यं कल्प्यते आरोग्यकामो भेषजपानं कुर्यात् इत्यादि लौकिकलि
ङः क्रियायाः कार्यत्वं लक्षणेति चेन्न यागस्याप्ययोग्यतानिश्चया
भावेन साधनताप्रतीत्यनंतरं तन्निर्वाहार्थं अवांतर व्यापार
तया अपूर्वकल्पनात् कीर्तनादिना नाशश्रुते न यागध्वंसो व्या
पारः लोकव्युत्पत्तिर्बलात् क्रियायामेव कृतिसाध्येष्टसाधनत्वं
लिङा बोध्यत इति लिङत्वेन रूपेण विध्यर्थत्वं आख्यातत्वेन प्र

त॰दी॰
२२

14

यत्नार्थत्वं पचति पाकं करोतीति विवरणदर्शनात् किंकरोतीति प्रश्नेपचतीत्यु
त्तरसादाख्यातस्य यत्नार्थकत्वनियमात् रथोगच्छतीत्यादौ अनुकूलव्या
पारेलक्षणा देवदत्तेनपच्यतेतंडुलः देवदत्तःपचतितंडुलमित्यादौकर्तृक
र्मणोर्नाख्यातार्थत्वं किंतुतृतीयादीनामेवतत्पोरात्तदुपपदेवलाभः
प्रजयतीत्यादौधातोरेवप्रकर्षेशक्तिः उपसर्गोद्योतकत्वमेवनतत्त्वरा।
किमस्यपदार्थज्ञानस्यपरमप्रयोजनंमोक्षः तथाहि आत्मावारेद्रष्ट
व्यः श्रोतव्योमंतव्योनिदिध्यासितव्य इतिश्रुत्याश्रवणादीनांसाक्षात्
कारहेतुत्वबोधनात् श्रुत्यादेहादिविलक्षणात्मज्ञानेसत्यपिअसं
भावनानिवृत्तेःयुक्त्यनुसंधानरूपमननसाध्यत्वात् मननोपयोगि
पदार्थनिरूपणद्वारा शास्त्रस्यापिमोक्षोपयोगः तदनंतरंश्रुत्योपदि
ष्टयोगविधिनानिदिध्यासनेकृतेतदनंतरंदेहादिविलक्षणात्मसाक्षा
त्कारेसतिदेहादौअहमभिमानरूपमिथ्याज्ञाननाशेसतिदोषाभावा
त् प्रवृत्त्यभावेधर्माधर्मयोरभावात् जन्माभावेधर्माधर्मयोरनुभवेन
नाशाच्चरमदुःखध्वंसमोक्षोपपत्तेः ज्ञानमेवमोक्षसाधनमित्याशा

राम:
२३

प्रतिवंधकत्वं। तत्रापिसाधारणस्यव्यभिचाराभावत्वेन। विरु
द्धस्यसामानाधिकरण्याभावत्वेन। व्याप्यत्वासिद्धस्यवि
शिष्टव्याप्याभावत्वेन। ऽसाधारणानुपसंहारिणोर्व्याप्ति
संशयाधायकत्वेनचव्याप्तिज्ञानप्रतिवंधकत्वंआश्र
यासिद्धिस्वरूपासिद्ध्योः पक्षधर्मताज्ञानप्रतिवंधक
त्वं उपाधिस्तुव्यभिचारज्ञानद्वाराव्याप्तिज्ञानप्रतिवंधकः
सिद्धसाधनंतुपक्षताविघटकतयाआश्रयासिद्धेः अंतर्भ
वतीतिप्रांचः निग्रहस्थानांतरमितिनवीनाः इत्यनुमा
नम् उपमानंलक्षयति उपमितिरिति इत्युपमानम्॥
शब्दंलक्षयति आप्तेति वाक्यमिति॥ पदलक्षणमाह
शक्तमिति अर्थस्मृत्यनुकूलपदपदार्थसंबंधः शक्तिः सा
चपदार्थांतरमितिमीमांसकाः तन्निरासायाह अस्मा

16

मुदाहरति यत्केति व्याप्यत्वासिद्धस्य लक्षणमाह सोपाधिके
ति॥ उपाधिलक्षणमाह साध्येति उपाधिश्चतुर्विधः केवल
साध्यव्यापकः पक्षधर्मावछिन्नसाध्यव्यापकः साधनावछिन्न
साध्यव्यापकः उदासीनधर्मावछिन्नसाध्यव्यापकश्चेति ॥
आद्यः आर्द्रेंधनसंयोगः द्वितीयो यथावायुस्तत्वतः प्रमे
यत्वादित्यत्र बहिर्द्रव्यत्वावछिन्नप्रत्यक्षत्वव्यापकं उद्भूत
रूपवत्वं तृतीयो यथाप्रागभावो नित्यंजन्यत्वादित्यत्रज
न्यत्वावछिन्नविनाशित्वव्यापकंभावत्वं चतुर्थस्तु प्रागभा
वो विनाशी प्रमेयत्वादित्यत्रजन्यत्वावछिन्न विनाशित्वव्या
पकंभावत्वं बाधितस्य लक्षणमाह यस्येति अत्रबाधितस्य
ग्राह्याभावेनिश्चयत्वेनसत्प्रतिपक्षस्यविरोधिज्ञानसाम
ग्रीत्वेनसाक्षादनुमितिप्रतिबंधकत्वं इतरेषांतुपरामर्श

वृत्तिः शक्यसंबंधो लक्षणा गंगायां घोष इत्यत्र गंगापदवाच्यप्रवाहसंबंधादेव
तीरोपस्थितौ तीरेपि शक्तिर्न कल्प्यते सैंधवादौ लवणाश्वयोः परस्पर
संबंधाभावान्नानाशक्तिकल्पनं लक्षणा त्रिविधा जहल्लक्षणा अजहल्ल
क्षणा जहदजहल्लक्षणा चेति यत्र वाच्यार्थस्यान्वयाभावः तत्र जहत् इ
ति यथा मंचाः क्रोशंतीति अत्र छत्रिशब्देन छत्रिणोऽछत्रिणश्च गृह्यंते
यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहदिति यथा
तत्त्वमसीति सोऽयमपि लक्षणैव लक्ष्यमाणगुणसंबंधस्वरूपाऽग्नि
र्माणवक इति व्यंजनापि गच्छ गच्छसि चेत्कांत पंथानः संतु ते शिवाः ममा
पि जन्म तत्रैव भूयाद्यत्र गतो भवानिति शब्दशक्तिमूला च लक्षणा
मूला अर्थशक्तिमूला च अनुमानादिनाऽन्यथासिद्धा गतोऽस्तमर्कः
तात्पर्यानुपपत्तिर्लक्षणाबीजं तत्प्रतीतीच्छया उच्चारितत्वं ता
त्पर्यं तात्पर्यज्ञानं च वाक्यार्थज्ञाने हेतुर्नानार्थानुरोधात् प्रकरणा
दिकं तात्पर्यग्राहकं द्वारमित्यादौ पिधेहीति शब्दाध्याहारः ननु

दिति डित्थादीनां इव घटनामपि संकेतरूपशक्तिः न तु पदार्थांतर
मित्यर्थः गवादिशब्दानां जातावेव शक्तिः विशेषणतया जातेः प्रथ
ममुपस्थितत्वात् व्यक्तिलाभस्त्वाक्षेपादिना इति केचित् तत्र गा
मानयेत्यादौ वृद्धव्यवहारेण सर्वत्रानयनादेर्व्यक्तावेव संभ
वे जातिविशिष्टव्यक्तावेव शक्तिकल्पनात् शक्तिग्रहश्च वृद्धव्य
वहारेण व्युत्पित्सुर्बालो गामानयेत्युत्तमवृद्धवाक्यश्रवणा
नंतरं मध्यमवृद्धस्य प्रवृत्त्यन्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य
अश्वमानय गां बधानेति वाक्यांतरे अश्वावापोद्वापाभ्यां गोश
ब्दस्य गोत्वविशिष्टे शक्तिं अश्वपदस्य अश्वत्वविशिष्टे इति व्युत्प
द्यते ननु सर्वत्र कार्यपरत्वाद्व्यवहारकार्यवाक्येष्वेव व्युत्प
त्तिः न सिद्धपरे इति चेन्न कांच्यां त्रिभुवनतिलको भूपतिरित्या
दौ सिद्धेपि व्यवहारात् विकसितपद्मे मधुकर इत्यादौ प्रसिद्धपद
समभिव्याहारात् सिद्धेपि मधुकरादेर्व्युत्पत्तिदर्शनाच्च लक्षणापि